ન ત્વાં વયં જડધિયો નુ વિદામ ભૂમન્
કૂટસ્થમાદિપુરુષં જગતામધીશમ્ ।
યત્સત્ત્વતઃ સુરગણા રજસઃ પ્રજેશા
મન્યોશ્ચ ભૂતપતયઃ સ ભવાન્ ગુણેશઃ ॥ ૧૪॥

કામં પ્રયાહિ જહિ વિશ્રવસોઽવમેહં
ત્રૈલોક્યરાવણમવાપ્નુહિ વીર પત્નીમ્ ।
બધ્નીહિ સેતુમિહ તે યશસો વિતત્યૈ
ગાયન્તિ દિગ્વિજયિનો યમુપેત્ય ભૂપાઃ ॥ ૧૫॥

બદ્ધ્વોદધૌ રઘુપતિર્વિવિધાદ્રિકૂટૈઃ
સેતું કપીન્દ્રકરકમ્પિતભૂરુહાઙ્ગૈઃ ।
સુગ્રીવનીલહનુમત્પ્રમુખૈરનીકૈ-
ર્લઙ્કાંવિભીષણદૃશાઽઽવિશદગ્રદગ્ધામ્ ॥ ૧૬॥

સા વાનરેન્દ્રબલરુદ્ધવિહારકોષ્ઠ-
શ્રીદ્વારગોપુરસદોવલભીવિટઙ્કા ।
નિર્ભજ્યમાનધિષણધ્વજહેમકુમ્ભ-
શ ૃઙ્ગાટકા ગજકુલૈર્હ્રદિનીવ ઘૂર્ણા ॥ ૧૭॥

રક્ષઃપતિસ્તદવલોક્ય નિકુમ્ભકુમ્ભ-
ધૂમ્રાક્ષદુર્મુખસુરાન્તકનરાન્તકાદીન્ ।
પુત્રં પ્રહસ્તમતિકાયવિકમ્પનાદીન્
સર્વાનુગાન્ સમહિનોદથ કુમ્ભકર્ણમ્ ॥ ૧૮॥

તાં યાતુધાનપૃતનામસિશૂલચાપ-
પ્રાસર્ષ્ટિશક્તિશરતોમરખડ્ગદુર્ગામ્ ।
સુગ્રીવલક્ષ્મણમરુત્સુતગન્ધમાદ-
નીલાઙ્ગદર્ક્ષપનસાદિભિરન્વિતોઽગાત્ ॥ ૧૯॥

તેઽનીકપા રઘુપતેરભિપત્ય સર્વે
દ્વન્દ્વં વરૂથમિભપત્તિરથાશ્વયોધૈઃ ।
જઘ્નુર્દ્રુમૈર્ગિરિગદેષુભિરઙ્ગદાદ્યાઃ
સીતાભિમર્શહતમઙ્ગલરાવણેશાન્ ॥ ૨૦॥

રક્ષઃપતિઃ સ્વબલનષ્ટિમવેક્ષ્ય રુષ્ટ
આરુહ્ય યાનકમથાભિસસાર રામમ્ ।

સોઽપિ તદ્વયસા કામાન્ યથાવજ્જુજુષે નૃપ ॥ ૪૫॥

સપ્તદ્વીપપતિઃ સંયક્ પિતૃવત્પાલયન્ પ્રજાઃ ।
યથોપજોષં વિષયાઞ્જુજુષેઽવ્યાહતેન્દ્રિયઃ ॥ ૪૬॥

દેવયાન્યપ્યનુદિનં મનોવાગ્દેહવસ્તુભિઃ ।
પ્રેયસઃ પરમાં પ્રીતિમુવાહ પ્રેયસી રહઃ ॥ ૪૭॥

અયજદ્યજ્ઞપુરુષં ક્રતુભિર્ભૂરિદક્ષિણૈઃ ।
સર્વદેવમયં દેવં સર્વવેદમયં હરિમ્ ॥ ૪૮॥

યસ્મિન્નિદં વિરચિતં વ્યોમ્નીવ જલદાવલિઃ ।
નાનેવ ભાતિ નાભાતિ સ્વપ્નમાયામનોરથઃ ॥ ૪૯॥

તમેવ હૃદિ વિન્યસ્ય વાસુદેવં ગુહાશયમ્ ।
નારાયણમણીયાંસં નિરાશીરયજત્પ્રભુમ્ ॥ ૫૦॥

એવં વર્ષસહસ્રાણિ મનઃષષ્ઠૈર્મનઃસુખમ્ ।
વિદધાનોઽપિ નાતૃપ્યત્સાર્વભૌમઃ કદિન્દ્રિયૈઃ ॥ ૫૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં નવમસ્કન્ધે અષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ એકોનવિંશોઽધ્યાયઃ - ૧૯ ॥

શ્રીશુક ઉવાચ
સ ઇત્થમાચરન્ કામાન્ સ્ત્રૈણોઽપહ્નવમાત્મનઃ ।
બુદ્ધ્વા પ્રિયાયૈ નિર્વિણ્ણો ગાથામેતામગાયત ॥ ૧॥

શૃણુ ભાર્ગવ્યમૂં ગાથાં મદ્વિધાચરિતાં ભુવિ ।
ધીરા યસ્યાનુશોચન્તિ વને ગ્રામનિવાસિનઃ ॥ ૨॥

બસ્ત એકો વને કશ્ચિદ્વિચિન્વન્ પ્રિયમાત્મનઃ ।
દદર્શ કૂપે પતિતાં સ્વકર્મવશગામજામ્ ॥ ૩॥

પુષ્કરારુણિરિત્યત્ર યે બ્રાહ્મણગતિં ગતાઃ ।
બૃહત્ક્ષત્રસ્ય પુત્રોઽભૂદ્ધસ્તી યદ્ધસ્તિનાપુરમ્ ॥ ૨૦॥

અજમીઢો દ્વિમીઢશ્ચ પુરુમીઢશ્ચ હસ્તિનઃ ।
અજમીઢસ્ય વંશ્યાઃ સ્યુઃ પ્રિયમેધાદયો દ્વિજાઃ ॥ ૨૧॥

અજમીઢાદ્બૃહદિષુસ્તસ્ય પુત્રો બૃહદ્ધનુઃ ।
બૃહત્કાયસ્તતસ્તસ્ય પુત્ર આસીજ્જયદ્રથઃ ॥ ૨૨॥

તત્સુતો વિશદસ્તસ્ય સેનજિત્સમજાયત ।
રુચિરાશ્વો દૃઢહનુઃ કાશ્યો વત્સશ્ચ તત્સુતાઃ ॥ ૨૩॥

રુચિરાશ્વસુતઃ પારઃ પૃથુસેનસ્તદાત્મજઃ ।
પારસ્ય તનયો નીપસ્તસ્ય પુત્રશતં ત્વભૂત્ ॥ ૨૪॥

સ કૃત્વ્યાં શુકકન્યાયાં બ્રહ્મદત્તમજીજનત્ ।
સ યોગી ગવિ ભાર્યાયાં વિષ્વક્સેનમધાત્સુતમ્ ॥ ૨૫॥

જૈગીષવ્યોપદેશેન યોગતન્ત્રં ચકાર હ ।
ઉદક્સ્વનસ્તતસ્તસ્માદ્ભલ્લાદો બાર્હદીષવાઃ ॥ ૨૬॥

યવીનરો દ્વિમીઢસ્ય કૃતિમાંસ્તત્સુતઃ સ્મૃતઃ ।
નામ્ના સત્યધૃતિર્યસ્ય દૃઢનેમિઃ સુપાર્શ્વકૃત્ ॥ ૨૭॥

સુપાર્શ્વાત્સુમતિસ્તસ્ય પુત્રઃ સન્નતિમાંસ્તતઃ ।
કૃતિર્હિરણ્યનાભાદ્યો યોગં પ્રાપ્ય જગૌ સ્મ ષટ્ ॥ ૨૮॥

સંહિતાઃ પ્રાચ્યસામ્નાં વૈ નીપો હ્યુગ્રાયુધસ્તતઃ ।
તસ્ય ક્ષેમ્યઃ સુવીરોઽથ સુવીરસ્ય રિપુઞ્જયઃ ॥ ૨૯॥

તતો બહુરથો નામ પુરમીઢોઽપ્રજોઽભવત્ ।
નલિન્યામજમીઢસ્ય નીલઃ શાન્તિઃ સુતસ્તતઃ ॥ ૩૦॥

શાન્તેઃ સુશાન્તિસ્તત્પુત્રઃ પુરુજોઽર્કસ્તતોઽભવત્ ।
ભર્મ્યાશ્વસ્તનયસ્તસ્ય પઞ્ચાસન્ મુદ્ગલાદયઃ ॥ ૩૧॥

યવીનરો બૃહદિષુઃ કામ્પિલ્યઃ સઞ્જયઃ સુતાઃ ।
ભર્મ્યાશ્વઃ પ્રાહ પુત્રા મે પઞ્ચાનાં રક્ષણાય હિ ॥ ૩૨॥

વિષયાણામલમિમે ઇતિ પઞ્ચાલસંજ્ઞિતાઃ ।
મુદ્ગલાદ્બ્રહ્મ નિર્વૃત્તં ગોત્રં મૌદ્ગલ્યસંજ્ઞિતમ્ ॥ ૩૩॥

સર્વાતિરથજિદ્વીર ઉત્તરાયાં તતો ભવાન્ ॥ ૩૩॥

પરિક્ષીણેષુ કુરુષુ દ્રૌણેર્બ્રહ્માસ્ત્રતેજસા ।
ત્વં ચ કૃષ્ણાનુભાવેન સજીવો મોચિતોઽન્તકાત્ ॥ ૩૪॥

તવેમે તનયાસ્તાત જનમેજયપૂર્વકાઃ ।
શ્રુતસેનો ભીમસેન ઉગ્રસેનશ્ચ વીર્યવાન્ ॥ ૩૫॥

જનમેજયસ્ત્વાં વિદિત્વા તક્ષકાન્નિધનં ગતમ્ ।
સર્પાન્ વૈ સર્પયાગાગ્નૌ સ હોષ્યતિ રુષાન્વિતઃ ॥ ૩૬॥

કાવષેયં પુરોધાય તુરં તુરગમેધયાટ્ ।
સમન્તાત્પૃથિવીં સર્વાં જિત્વા યક્ષ્યતિ ચાધ્વરૈઃ ॥ ૩૭॥

તસ્ય પુત્રઃ શતાનીકો યાજ્ઞવલ્ક્યાત્ત્રયીં પઠન્ ।
અસ્ત્રજ્ઞાનં ક્રિયાજ્ઞાનં શૌનકાત્પરમેષ્યતિ ॥ ૩૮॥

સહસ્રાનીકસ્તત્પુત્રસ્તતશ્ચૈવાશ્વમેધજઃ ।
અસીમકૃષ્ણસ્તસ્યાપિ નેમિચક્રસ્તુ તત્સુતઃ ॥ ૩૯॥

ગજાહ્વયે હૃતે નદ્યા કૌશામ્બ્યાં સાધુ વત્સ્યતિ ।
ઉક્તસ્તતશ્ચિત્રરથસ્તસ્માત્કવિરથઃ સુતઃ ॥ ૪૦॥

તસ્માચ્ચ વૃષ્ટિમાંસ્તસ્ય સુષેણોઽથ મહીપતિઃ ।
સુનીથસ્તસ્ય ભવિતા નૃચક્ષુર્યત્સુખીનલઃ ॥ ૪૧॥

પરિપ્લવઃ સુતસ્તસ્માન્મેધાવી સુનયાત્મજઃ ।
નૃપઞ્જયસ્તતો દૂર્વસ્તિમિસ્તસ્માજ્જનિષ્યતિ ॥ ૪૨॥

તિમેર્બૃહદ્રથસ્તસ્માચ્છતાનીકઃ સુદાસજઃ ।
શતાનીકાદ્દુર્દમનસ્તસ્યાપત્યં મહીનરઃ ॥ ૪૩॥

દણ્ડપાણિર્નિમિસ્તસ્ય ક્ષેમકો ભવિતા નૃપઃ ।
બ્રહ્મક્ષત્રસ્ય વૈ પ્રોક્તો વંશો દેવર્ષિસત્કૃતઃ ॥ ૪૪॥

ક્ષેમકં પ્રાપ્ય રાજાનં સંસ્થાં પ્રાપ્સ્યતિ વૈ કલૌ ।
અથ માગધરાજાનો ભવિતારો વદામિ તે ॥ ૪૫॥

ભવિતા સહદેવસ્ય માર્જારિર્યચ્છ્રુતશ્રવાઃ ।
તતોઽયુતાયુસ્તસ્યાપિ નિરમિત્રોઽથ તત્સુતઃ ॥ ૪૬॥

મહાહયો વેણુહયો હૈહયશ્ચેતિ તત્સુતાઃ ॥ ૨૧॥

ધર્મસ્તુ હૈહયસુતો નેત્રઃ કુન્તેઃ પિતા તતઃ ।
સોહઞ્જિરભવત્કુન્તેર્મહિષ્માન્ ભદ્રસેનકઃ ॥ ૨૨॥

દુર્મદો ભદ્રસેનસ્ય ધનકઃ કૃતવીર્યસૂઃ ।
કૃતાગ્નિઃ કૃતવર્મા ચ કૃતૌજા ધનકાત્મજાઃ ॥ ૨૩॥

અર્જુનઃ કૃતવીર્યસ્ય સપ્તદ્વીપેશ્વરોઽભવત્ ।
દત્તાત્રેયાદ્ધરેરંશાત્પ્રાપ્તયોગમહાગુણઃ ॥ ૨૪॥

ન નૂનં કાર્તવીર્યસ્ય ગતિં યાસ્યન્તિ પાર્થિવાઃ ।
યજ્ઞદાનતપોયોગશ્રુતવીર્યદયાદિભિઃ ॥ ૨૫॥

પઞ્ચાશીતિ સહસ્રાણિ હ્યવ્યાહતબલઃ સમાઃ ।
અનષ્ટવિત્તસ્મરણો બુભુજેઽક્ષય્યષડ્વસુ ॥ ૨૬॥

તસ્ય પુત્રસહસ્રેષુ પઞ્ચૈવોર્વરિતા મૃધે ।
જયધ્વજઃ શૂરસેનો વૃષભો મધુરૂર્જિતઃ ॥ ૨૭॥

જયધ્વજાત્તાલજઙ્ઘસ્તસ્ય પુત્રશતં ત્વભૂત્ ।
ક્ષત્રં યત્તાલજઙ્ઘાખ્યમૌર્વતેજોપસંહૃતમ્ ॥ ૨૮॥

તેષાં જ્યેષ્ઠો વીતિહોત્રો વૃષ્ણિઃ પુત્રો મધોઃ સ્મૃતઃ ।
તસ્ય પુત્રશતં ત્વાસીદ્વૃષ્ણિજ્યેષ્ઠં યતઃ કુલમ્ ॥ ૨૯॥

માધવા વૃષ્ણયો રાજન્ યાદવાશ્ચેતિ સંજ્ઞિતાઃ ।
યદુપુત્રસ્ય ચ ક્રોષ્ટોઃ પુત્રો વૃજિનવાંસ્તતઃ ॥ ૩૦॥

શ્વાહિસ્તતો રુશેકુર્વૈ તસ્ય ચિત્રરથસ્તતઃ ।
શશબિન્દુર્મહાયોગી મહાભોજો મહાનભૂત્ ॥ ૩૧॥

ચતુર્દશમહારત્નશ્ચક્રવર્ત્યપરાજિતઃ ।
તસ્ય પત્નીસહસ્રાણાં દશાનાં સુમહાયશાઃ ॥ ૩૨॥

દશલક્ષસહસ્રાણિ પુત્રાણાં તાસ્વજીજનત્ ।
તેષાં તુ ષટ્ પ્રધાનાનાં પૃથુશ્રવસ આત્મજઃ ॥ ૩૩॥

ધર્મો નામોશના તસ્ય હયમેધશતસ્ય યાટ્ ।
તત્સુતો રુચકસ્તસ્ય પઞ્ચાસન્નાત્મજાઃ શ‍ૃણુ ॥ ૩૪॥

પુરુજિદ્રુક્મરુક્મેષુપૃથુજ્યામઘસંજ્ઞિતાઃ ।
જ્યામઘસ્ત્વપ્રજોઽપ્યન્યાં ભાર્યાં શૈબ્યાપતિર્ભયાત્ ॥ ૩૫॥

નાવિન્દચ્છત્રુભવનાદ્ભોજ્યાં કન્યામહારષીત્ ।
રથસ્થાં તાં નિરીક્ષ્યાહ શૈબ્યા પતિમમર્ષિતા ॥ ૩૬॥

કેયં કુહક મત્સ્થાનં રથમારોપિતેતિ વૈ ।
સ્નુષા તવેત્યભિહિતે સ્મયન્તી પતિમબ્રવીત્ ॥ ૩૭॥

અહં વન્ધ્યાસપત્ની ચ સ્નુષા મે યુજ્યતે કથમ્ ।
જનયિષ્યસિ યં રાજ્ઞિ તસ્યેયમુપયુજ્યતે ॥ ૩૮॥

અન્વમોદન્ત તદ્વિશ્વેદેવાઃ પિતર એવ ચ ।
શૈબ્યા ગર્ભમધાત્કાલે કુમારં સુષુવે શુભમ્ ।
સ વિદર્ભ ઇતિ પ્રોક્ત ઉપયેમે સ્નુષાં સતીમ્ ॥ ૩૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
નવમસ્કન્ધે યદુવંશાનુવર્ણને ત્રયોવિંશોઽધ્યાયઃ ॥ ૨૩॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ ચતુર્વિંશોઽધ્યાયઃ - ૨૪ ॥

શ્રીશુક ઉવાચ
તસ્યાં વિદર્ભોઽજનયત્પુત્રૌ નામ્ના કુશક્રથૌ ।
તૃતીયં રોમપાદં ચ વિદર્ભકુલનન્દનમ્ ॥ ૧॥

રોમપાદસુતો બભ્રુર્બભ્રોઃ કૃતિરજાયત ।
ઉશિકસ્તત્સુતસ્તસ્માચ્ચેદિશ્ચૈદ્યાદયો નૃપ ॥ ૨॥

ક્રથસ્ય કુન્તિઃ પુત્રોઽભૂદ્વૃષ્ટિસ્તસ્યાથ નિર્વૃતિઃ ।
તતો દશાર્હો નામ્નાભૂત્તસ્ય વ્યોમઃ સુતસ્તતઃ ॥ ૩॥

જીમૂતો વિકૃતિસ્તસ્ય યસ્ય ભીમરથઃ સુતઃ ।
તતો નવરથઃ પુત્રો જાતો દશરથસ્તતઃ ॥ ૪॥

કરમ્ભિઃ શકુનેઃ પુત્રો દેવરાતસ્તદાત્મજઃ ।

કુકુરો ભજમાનશ્ચ શુચિઃ કમ્બલબર્હિષઃ ।
કુકુરસ્ય સુતો વહ્નિર્વિલોમા તનયસ્તતઃ ॥ ૧૯॥

કપોતરોમા તસ્યાનુઃ સખા યસ્ય ચ તુમ્બુરુઃ ।
અન્ધકો દુન્દુભિસ્તસ્માદવિદ્યોતઃ પુનર્વસુઃ ॥ ૨૦॥

તસ્યાહુકશ્ચાહુકી ચ કન્યા ચૈવાહુકાત્મજૌ ।
દેવકશ્ચોગ્રસેનશ્ચ ચત્વારો દેવકાત્મજાઃ ॥ ૨૧॥

દેવવાનુપદેવશ્ચ સુદેવો દેવવર્ધનઃ ।
તેષાં સ્વસારઃ સપ્તાસન્ ધૃતદેવાદયો નૃપ ॥ ૨૨॥

શાન્તિદેવોપદેવા ચ શ્રીદેવા દેવરક્ષિતા ।
સહદેવા દેવકી ચ વસુદેવ ઉવાહ તાઃ ॥ ૨૩॥

કંસઃ સુનામા ન્યગ્રોધઃ કઙ્કઃ શઙ્કુઃ સુહૂસ્તથા ।
રાષ્ટ્રપાલોઽથ સૃષ્ટિશ્ચ તુષ્ટિમાનૌગ્રસેનયઃ ॥ ૨૪॥

કંસા કંસવતી કઙ્કા શૂરભૂ રાષ્ટ્રપાલિકા ।
ઉગ્રસેનદુહિતરો વસુદેવાનુજસ્ત્રિયઃ ॥ ૨૫॥

શૂરો વિદૂરથાદાસીદ્ભજમાનઃ સુતસ્તતઃ ।
શિનિસ્તસ્માત્સ્વયં ભોજો હૃદીકસ્તત્સુતો મતઃ ॥ ૨૬॥

દેવબાહુઃ શતધનુઃ કૃતવર્મેતિ તત્સુતાઃ ।
દેવમીઢસ્ય શૂરસ્ય મારિષા નામ પત્ન્યભૂત્ ॥ ૨૭॥

તસ્યાં સ જનયામાસ દશ પુત્રાનકલ્મષાન્ ।
વસુદેવં દેવભાગં દેવશ્રવસમાનકમ્ ॥ ૨૮॥

સૃઞ્જયં શ્યામકં કઙ્કં શમીકં વત્સકં વૃકમ્ ।
દેવદુન્દુભયો નેદુરાનકા યસ્ય જન્મનિ ॥ ૨૯॥

વસુદેવં હરેઃ સ્થાનં વદન્ત્યાનકદુન્દુભિમ્ ।
પૃથા ચ શ્રુતદેવા ચ શ્રુતકીર્તિઃ શ્રુતશ્રવાઃ ॥ ૩૦॥

રાજાધિદેવી ચૈતેષાં ભગિન્યઃ પઞ્ચ કન્યકાઃ ।
કુન્તેઃ સખ્યુઃ પિતા શૂરો હ્યપુત્રસ્ય પૃથામદાત્ ॥ ૩૧॥

સાઽઽપ દુર્વાસસો વિદ્યાં દેવહૂતીં પ્રતોષિતાત્ ।
તસ્યા વીર્યપરીક્ષાર્થમાજુહાવ રવિં શુચિમ્ ॥ ૩૨॥

